**ईशानादिपञ्चमूर्त्ति** स्त्री ब०व० ईशानादयः पञ्च मूर्त्तयः । महादेवस्य "ईशानतत्पुरुषाघोरवामदेवसद्योजातरूपेषु पञ्चसु रूपेषु तन्न्यासप्रयोगस्तन्त्रसारे शिवप्रकरणे दृश्यः ।

**ईशावास्य** पु० ईशा वास्यम् इति पदमस्त्यस्य अच् । "ईशावास्यमिदं सर्वमित्यादिके यजुर्वेदस्य४० अध्यायस्थे ब्रह्मविद्याप्रतिपादके उपनिषद्रूपे ग्रन्थे । "यजुर्वेदोपनिषद्गणनायाम् "ईशावास्य, वृहदारण्यक, जावाल, हंस, परमहंसेत्यादि मुक्ति० उ० । तत्रोत्तरलोपे ईशापि । "ईशा केन कठप्रश्नः मुण्डमाण्डूक्यतित्तिरिः । ऐतरेयं च छान्दोग्यं वृहदारण्यकं तथा" मुक्ति०उ० । इयमेवेशावास्योपनिषदित्युच्यते ।

**ईशितृ** त्रि०' ईष्टे ईश–तृच् स्त्रियां ङीप् । ईश्वरे । "न तस्य कश्चित् पतिरस्ति नेशिता" श्वेता०उ० ।

**ईशितव्य** त्रि० ईश–तव्य ।१अधीने यं प्रति ऐश्वर्य्यं क्रियते तस्मिन् । भावे तव्य । २ऐश्वर्य्ये न० ।

**ईशिता** स्त्री ईशिनो भावः तल् । अणिमाद्यष्टैश्वर्य्यमध्ये सर्वेषां स्वामित्वरूपे १ऐश्वर्य्ये । त्व ईशित्वमप्यत्र न० । "ईशित्वञ्च वशित्वञ्च तथा कामावसायिता"सां०कौ० । "ईशित्वञ्च वशित्वञ्च लघुत्वं मनसश्च ते"भा०आ०२८अ० "येन स्थावरादिसर्वभूतानि वशीभूतानि भवन्ति तादृशे योगजन्ये २धर्मभेदे च । ऐश्वर्य्यशब्दे विवृतिः ।

**ईशिन्** त्रि०ईष्टे ईश–णिनि । १ईश्वरे २प्रभौ ३पत्यौ । "शंसेद्ग्रामदशेशाय दशेशोविंशतीशिनम्" मनुः स्त्रियां ङीप् । "सर्वांश्चोँ कानीशिनीभिः" श्वेता० उ० ।

**ईश्वर** पु०ईश–वरच् । १महादेवे २कन्दर्पे पातञ्जलोक्ते, क्लेशजन्मकर्मविपाकाशयैरपरामृष्टे पुरुषविशेषे ३चैतन्यात्मनि, "ईश एवाहमत्यर्थं न च मामीशते परे । ददामि च सदैश्वर्य्यमीश्वरस्तेन कीर्त्त्यते" इत्युक्तलक्षणे ४परमेश्वरे, "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति" गीता प्रभवादिमध्ये ५एकादशे वत्सरे च तत्फलम् ।"सुभिक्षं क्षेममारोग्यं कार्पासस्य महार्घता । लवणं मधु गव्यञ्च ईश्वरे दुर्लभं प्रिये !" ज्योति० ६आढ्ये, ७स्वामिनि च त्रि०स्त्रीत्वे गौरा०ङीष् । "ईश्वरीं सर्वभूतानामिति" श्रीसूक्तम् ।

आर्हता नित्येश्वरं न मन्यन्ते तच्च अर्हच्छब्दे २८२पृष्ठे दर्शितम् एवं सांख्यैरपि "ईश्वरासिद्धेः" सां०सू० । "नित्येश्वरो निषिद्धः ईदृशेश्वरसिद्धिः सिद्धा" "उपास्यसिद्धस्य प्रशंसामात्रम्" सां० सूत्राभ्यां प्रकृत्युपासकस्य जन्यैश्वर्य्यं स्वीकृतम्" सां० कौ० च नित्येश्वरस्य कर्त्तृत्वं निरासितं यथा ।

"न च क्षीरप्रवृत्तेरपीश्वराधिष्ठाननिबन्धनत्वेन साध्यत्वान्न साध्येन व्यभिचारइति साम्प्रतं प्रेक्षावत्प्रवृत्तेः स्वार्थकारुण्याभ्यां व्याप्तत्वात् ते च जगत्सर्गाद्व्यावर्त्तमाने प्रेक्षावत्प्रवृत्तिपूर्व्वकत्वमपि व्यावर्त्तयतः नह्यवाप्तसकलेप्सितस्य भगवतोजगत्सृजतः किमप्यभिलषितं भवति नापि कारुण्यादस्य सर्गे प्रवृत्तिः प्राक् सर्गाज्जीवानामिन्द्रियशरीरविषयानुत्पत्तौ दुःखाभावेन कस्य प्रहाणेच्छा कारुण्यं ? सर्गोत्तरकालं दुःखिनोऽवलोक्य कारुण्याभ्युपगमे दुरुत्तरमितरेतराश्रयत्वं कारुण्येन सृष्टिः सृष्ट्या च कारुण्यमिति । अपि च करुणया प्रेरितः ईश्वरः सुखिन एव जन्तून् सृजेन्न विचित्रान् । कर्म्मवैचित्र्यादिति चेत् कृतमस्य प्रेक्षावतः कर्म्माधिष्ठानेन तदनधिष्ठानमात्रादेवाचेतनस्यापि कर्मणः प्रवृत्त्यनुपपत्तेस्तत्कार्य्यशरीरेन्द्रियविषयानुत्पत्तौ दुःखानुत्पत्तेरपि सुकरत्वात् । प्रकृतेस्त्वचेतनयाः प्रवृत्तेर्न स्वार्थानुग्रहो न वा कारुण्यं प्रयोजकमिति नोक्तदोषप्रसङ्गावतारः" ।

नित्येश्वरस्य यथानुमानं तथा आन्वीक्षिकीशब्दे ७२८ पृष्ठे सर्वदर्शनसंग्रहवाक्येन प्रदर्शितम् ईश्वरसाधनं तु गौ० सूत्रवृत्त्याद्युक्तं यथा "ईश्वरः कारणं पुरुषकर्म्मसाफल्यदर्शनात्" सू० । "गुणविशिष्टमात्मान्तरमीश्वरः" भा० । "गुणैर्नित्येच्छाप्रयत्नैर्विशेषगुणैः, सामान्यैः संयोगादिभिश्च विशिष्टमात्मान्तरं जीवेभ्यो भिन्न आत्मा जगदाराध्यः सृष्ट्यादिकर्त्ता वेदद्वारा हिताहितोपदेशको जगतः पितेति । अनुमानन्तु क्षित्यादिकं सकर्त्तृकं कार्य्यत्वाद्घटादिवदित्याद्यूह्यम्" वृत्तिः । वाणादसूत्रे च "संज्ञाकर्म्म त्वस्मद्विशिष्टानां लिङ्गम्" "प्रत्यक्षप्रवृत्ततया संज्ञाकर्मणः" सूत्राभ्यामीश्वरसाधनं दर्शितं विवृतमेतदुपस्कारे यथा ।

"तुशब्दः स्पर्शादिलिङ्गव्यवच्छेदार्थः संज्ञा नाम, कर्म्म कार्य्यम्"क्षित्यादि तदुभयमस्मद्विशिष्टानाम् ईश्वरमहर्षीणां सत्त्वेऽपि लिङ्गम् कथमेतदित्यत आह । अत्रापि संज्ञा च कर्म्म चेति समाहारद्वन्द्वादेकवद्भावः संज्ञाकर्त्तुर्जगत्कर्त्तुश्चाभेदसूचनार्थः । तथाहि यस्य स्वर्गापूर्व्वादयः प्रत्यक्षाः स एव तत्र स्वर्गापूर्व्वादिसंज्ञाः कर्त्तुमीष्टे नेतरः एवञ्च घटपटादिसंज्ञानिवेशनमपि ईश्वरसङ्केताधीनमेव यः शब्दो यत्रेश्वरेण सङ्केतितः स तत्र साधुः यथा या काचि-